# भारतीयदर्शनेषु ख्यातिविमर्शः

**प्रीतम-बेरा***
**डॉ॰ सुखदेवभट्टः** †

## Abstract

[भारतीयदर्शनेषु ख्यातिवादस्य माहात्म्यं दरीदृश्यते। सर्वेष्वेव दर्शनेषु ख्यातिवादस्य विषये विचारा पदङ्क्रुर्वते। प्रतिदर्शनं च तद्विचारप्रकारोऽपि भिद्यते। भ्रमज्ञानं तावत् प्रकृते ख्यातिपदवाच्यम्। विषयेऽस्मिन् पञ्च ख्यातिवादाः प्रसिद्धाः सन्ति। ते यथा आत्मख्यातिः असत्ख्यातिः अख्यातिः अन्यथाख्यातिः अनिर्वचनीयख्यातिश्च। तत्र योगाचारबौद्धानाम् आत्मख्यातिवादः, शून्यवादिनां माध्यमिकबौद्धानां च असत्ख्यातिवादः, प्राभाकरमीमांसकानाम् अख्यातिवादः, नैयायिकानां भाट्टमीमांसकानां च अन्यथाख्यातिवादः, अद्वैतवेदान्तिनां च अनिर्वचनीयख्यातिवादः। समेषामपि पञ्चानां वादानां स्वरूपं प्रबन्धेऽस्मिन् यथामति आलोचितम्, तदनु अनिर्वचनीयख्यातिवादेतरेषां चतुर्णां वादानां सयुक्ति अयाथार्थ्यं च प्रदर्शितम्। अन्ते अद्वैतवेदान्तानुसारी अनिर्वचनीयख्यातिवाद एव सिद्धान्तितः।]

**कुञ्चिकाशब्दाः—** आत्मख्यातिः, असत्ख्यातिः, अख्यातिः, अन्यथाख्यातिः, अनिर्वचनीयख्यातिः।

## प्रस्तावना

दृश्यते परमतत्त्वमनेनेति दर्शनम्। दृश्-धातोः करणार्थे करणाधिकरणयोश्च[१] [अष्टाध्यायी ३.३.११७] इत्यनेन ल्युट्प्रत्यये दर्शनशब्दो निष्पद्यते। परमतत्त्वज्ञानसाधकं हि शास्त्रं दर्शनमुच्यते। एकस्य साध्यस्य सिध्यर्थं तावन्नानोपायाः सम्भवन्ति। तथाह्युक्तं वाक्यपदीये "उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः" [भूषणसारः ६९] इति। तथैव तत्परमतत्त्वज्ञानस्य साधकानामपि नानात्वात् नाना दर्शनानि प्रवृत्तानि। तत्र नवसु भारतीयदर्शनेषु त्रीणि नास्तिकदर्शनानि, षड्

* शोधच्छात्रः, संस्कृतदर्सनविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने, वेलुडमठे, पश्चिमवङ्गेषु; Email : pritam99bera@gmail.com

† सहायकाचार्यः, संस्कृतदर्सनविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने, वेलुडमठे, पश्चिमवङ्गेषु; Email : sukhdevbhatt99@gmail.com

[१] करणे अधिकरणे च धातोर्ल्युट् स्यात्। [अष्टाध्यायी ३.३.११७]

आस्तिकदर्शनानि च प्रसिद्धानि । नवसु च तेषु चार्वाक-बौद्ध-जैनानि त्रीणि नास्तिकदर्शनानि, सांख्ययोगन्यायवैशेषिकपूर्वोत्तरमीमांसारूपाणि च षड् आस्तिकदर्शनानि पदङ्कुर्वते । वेदप्रामाण्यमनङ्गीकुर्वाणानि नास्तिकदर्शनानि, वेदप्रामाण्यमङ्गीकुर्वाणानि हि आस्तिकदर्शनानि । सर्वाणि चैतानि दर्शनानि स्वकीयवैशिष्ट्यान्मौलिकतां वहन्ति । प्रायः सर्वेषु दर्शनेषु मतभेदा दरीदृश्यन्ते । अतः प्रकृतप्रबन्धप्रतिपाद्यस्य ख्यातिवादस्य विषयेऽपि भिन्नानि मतानि पुष्यन्ति इमानि दर्शनानि । सोऽयं विषयः प्रकृतप्रबन्धस्य विषयतामेति ।

भारतीयदर्शनेषु ख्यातिवादस्य माहात्म्यं दरीदृश्यते । प्रकथनार्थे विद्यमानात् ख्या-धातोः अथवा व्यक्तायां वाचि विद्यमानात् चक्षिङ्-धातोः भावे क्तिन्-प्रत्यये ख्यातिशब्दो निष्पन्नः । ख्यातिशब्दस्य हि प्रसिद्धिर्ज्ञानं वा अर्थः । दर्शनशास्त्रेषु ख्यातिशब्दोऽयं भ्रमात्मकज्ञाने रूढो वर्तते । यथा—रज्जौ सर्पज्ञानं शुक्तौ रजतज्ञानं वा ख्यातिरुच्यते । प्रायः सर्वेषु दर्शनेषु अस्य वादस्य विषये चिन्तनं विहितम् । तत्र प्रतिदर्शनं विभ्रमप्रकारा भिन्ना वर्तन्ते । अतः ख्यातिविषये वादाः अपि भिन्नाः सञ्जाताः । तत्र आत्मख्यातिः, असत्ख्यातिः अख्यातिः अन्यथाख्यातिः अनिर्वचनीयख्यातिरिति पञ्च ख्यातयः प्रसिद्धाः सन्ति । उक्तञ्च आचार्यमण्डनमिश्रेण विभ्रमविवेकनामकग्रन्थे—

आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा ।
परीक्षकाणां विभ्रान्तौ विवादात्सा विविच्यते ॥ इति ।

[विभ्रमविवेकः, कारिका १]

एवमन्यत्रापि प्रोक्तम्—

आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा ।
तथानिर्वचनख्यातिरित्येतत्ख्यातिपञ्चकम् ॥
योगाचारा माध्यमिकास्तथा मीमांसका अपि ।
नैयायिका मायिनश्च पञ्च ख्यातीः क्रमाज्जगुः ॥ इति ।

एतेषु प्रसिद्धेषु पञ्चसु ख्यातिवादेषु आत्मख्यातिवादो विज्ञानवादिबौद्धानाम्, असत्ख्यातिवादो माध्यमिकानाम्, अख्यातिवादः प्राभाकरमीमांसकानाम्, अन्यथाख्यातिवादो नैयायिकानां भाट्टमीमांसकानां च, अनिर्वचनीयख्यातिवादश्च अद्वैतवेदान्तिनां वर्तते । पञ्चानाममीषां

स्वरूपं संक्षेपेण प्रस्तूय अद्वैतवेदान्तिभिरङ्गीकृतम् अनिर्वचनीयख्यातिवादं सिद्धान्तत्वेन समुपस्थापयता प्रबन्धकृता मया इतरवादचतुष्टयस्य पूर्वपक्षत्वं विधीयते ।

**आत्मख्यातिवादः**

विज्ञानवादिबौद्धानां हि आत्मख्यातिवादो वर्तते । तन्मतानुसारं केवलम् आन्तरविज्ञानम् अथवा बुद्धिरेव अस्ति, तद्व्यतिरिक्तं न किञ्चित् वस्तु विद्यते । इदं च विज्ञानं स्वतःप्रकशमानं क्षणिकं च । रूपरसादिमतो बाह्यजगतोऽस्य परमार्थतो न बाह्यत्वम्, अपि तु आन्तरविज्ञानमात्रत्वम्, अन्तरेव तस्य प्रतीतेः । बाह्यं यद्यत् प्रतीयेत, तत्सर्वं विज्ञानाकारमात्रम् । तच्च विज्ञानं प्रथमक्षणे उत्पद्यमानं द्वितीयक्षणे तत्सदृशं विज्ञानान्तरम् उत्पाद्य तृतीयक्षणे स्वयं विनश्यतीति कारणात् क्षणिकत्वं तस्य । इत्थं विज्ञानानां काचिद्धारा निरन्तरं प्रवहति एतेषां मते । अतः पुरोदृश्यमानो घटो घटाकारविज्ञानधारा एव, न तु परमार्थतो घटः । तस्माद् घटस्य बाह्यरूपेण प्रतीतिर्भ्रम एव ।

एतेषां मते शुक्तौ इदं रजतम् इति भ्रमात्मकज्ञाने प्रतीयमानं रजतं आन्तरविज्ञानाकारम् अस्ति, तस्य च विज्ञानाकारस्य रजतस्य बहिः आरोपो जायते । मनुष्याणां संस्कारानुगुणं ज्ञानं चित्तं वा बाह्याकारेण प्रतीयते । ज्ञानाकारेण वस्तुना बाह्याकारे ध्रियमाणे भ्रम उत्पद्यते, स एव भ्रमः आत्मख्यातिरित्युच्यते । शुक्तौ रजतप्रतीतिस्थले रजतं बहिर्नागच्छति, किन्तु तिमिरादिदोषवशाद् बहिः प्रतीयते । तेषां मते बाधज्ञानद्वारा इदन्तधर्मो बाध्यते, किन्तु आन्तररूपेण रजतस्य सत्त्वम् अस्त्येव । भगवान् शङ्कराचार्यः "स्मृतिरूपः परत्र पूर्वदृष्टावभासः"[२] इति अद्वैतसिद्धान्तानुसारम् अध्यासलक्षणमुक्त्वा पूर्वपक्षीयं लक्षणं स्पष्टयति—"तं केचिदन्यत्रान्यधर्माध्यास इति वन्दन्ति"[३] इति । तस्य पूर्वपक्षीयलक्षणस्य आत्मख्यातिवादे समन्वय इत्थम्—अन्यत्र अलीके बाह्ये इदम्रूपेण प्रतीयमाने शुक्तिकाकारविज्ञाने, अन्यधर्माध्यासः आन्तरविज्ञानाकारस्य रजतस्य अध्यासः इति ।

शुक्तौ इदं रजतम् इति स्थले आन्तरविज्ञानाकारे रजते यदा बाह्यतारूपायाः इदन्ताया आरोपो भवति, तदा इदं बाह्यं रजतम् इत्येवंप्रकारेण

[२] ब्रह्मसूत्रस्य अध्यासभाष्यम्
[३] ब्रह्मसूत्रस्य अध्यासभाष्यम्

बोधो जायते । विज्ञानस्य अनादिसंस्कार एव एतादृशारोपे हेतुः । सरलतया उच्यते चेत् भ्रमस्थले विज्ञानवादिनाम् एवं मतं यत् यदा इयं शुक्तिः इति आन्तरविज्ञानस्य इयमाकारविज्ञानधारा चलति, तस्मिन् समये यदि विज्ञानस्थितसंस्कारवशाद् रजताकारविज्ञानधारा आरभ्यते किञ्च इदन्ताकारविज्ञानधारारूपो बहिष्ट्वधर्मो यदि तस्यां रजताकारविज्ञानधारायां संक्रमितो जायते, तदैव इदम्रूपेण प्रतिभासमाने शुक्तिविज्ञाने रजतभ्रम उत्पद्यते । किञ्च तस्य इदन्तरूपस्य बहिष्ट्वधर्मस्य बाधे सति बाह्यरूपेण प्रतिभातस्य रजतस्यापि बाधो भवति । आन्तरविज्ञानाकारे रजते तु इदन्तारूपधर्मस्यैव बाधो भवति, न तु धर्मिणो रजतस्य । अत उक्तं भामत्याम्—"तद्वरमिदन्तैवास्य धर्मो बाध्यतां न पुना रजतमपि धर्मि"[४] इति ।

**आत्मख्यातिवादखण्डनम्**

शुक्तौ रजतभ्रमस्थले आन्तरस्य रजतस्य बाह्यदेशे अस्तित्वं नास्तीति विज्ञानवादिनां मतम् अनुभवविरुद्धं वर्तते । यतो हि सर्वे जनाः पुरोवर्तिरूपेण एव रजतस्य प्रत्यक्षं कुर्वन्ति, न तु सुखादिवद् अनुभवं कुर्वन्ति । यदि अत्र एवमपि स्वीकारः क्रियते यत् आन्तरस्य रजतस्य बाह्यत्वप्रतीतिर्भवति, तदापि प्रश्नः समुदेति यद् बाह्यरूपेण प्रतीयमानम् आन्तरं रजतं किं स्वयंप्रकाशम् उत अन्यसंवेद्यम् इति । रजतस्य नित्यत्वे सति तस्य बाधोऽपि न सम्भवेत् । अपि च स्वयंप्रकाशवस्तुनो भ्रमात्मकत्वमपि वक्तुमशक्यम् । रजतस्य अन्यसंवेद्यत्वे तु क्षणिकवादिनां विज्ञानस्य स्वयंप्रकाशत्वेन स्वीकारात्मकं स्वमतमेव विरुध्येत । इत्थम् आत्मख्यातिवादस्यायुक्तता साध्यते अद्वैतिभिः ।

**अन्यथाख्यातिवादः**

नैयायिकानां भाट्टमीमांसकानां च ख्यातिविषयको वादः अन्यथाख्यातिवाद उच्यते । अस्यैवापरं नाम विपरीतख्यातिरिति । अर्थाद् एकस्य वस्तुनः तद्भिन्नरूपेण प्रतीतिरन्यथाख्यातिः । एतन्मते शुक्तौ रजतभ्रमस्थले दोषयुक्तनेत्रसन्निकर्षे सति नेत्रगतदोषवशाद् वल्मीकादौ स्थितस्य सत्यभूतसर्पस्य पुरोदेशे प्रतीतिर्जायते । एवं दूरे स्थितस्य वस्तुनः

[४] भामती

सम्मुखे ख्यातिः अर्थात् दृष्टिगोचराभावे अपि निकटवर्तित्वरूपभिन्नधर्मेण प्रतीतिः अन्यथाख्यातिः । एवमत्र वल्मीकादिदेशान्तरस्थं रजतमेव पुरोवर्तिन्यां शुक्तौ प्रतिभासते इति अन्यथाख्यातिवादिनां मतम् । इदं च मतं प्राचीननैयायिकानां वर्तते । नव्यास्तु नेदमङ्गीकुर्वन्ति । तेषां नये रज्जौ सर्पभ्रमस्थले प्रथमतः इदमिति सामान्यज्ञानमुत्पद्यते, तत्र इन्द्रियदोषाद् रज्जुत्वविशिष्टरज्जुज्ञानं नैव जायते । एवं सामान्यज्ञानोत्पत्तेरनन्तरं विशेषज्ञानाकाङ्क्षायां रज्जुसर्पयोः सादृश्यात् तत्सादृश्यज्ञानम् उद्बोधकं सत् वल्मीकादिस्थस्य पूर्वानुभूतस्य सर्पस्य संस्कारम् उद्बोधयति । तत्संस्काराच्च पूर्वदृष्टस्य सत्यभूतस्य सर्पस्य स्मृतिरुत्पद्यते । ततो ज्ञानलक्षणाख्यसन्निकर्षेण वल्मीकस्थसर्पस्य प्रत्यक्षज्ञानं जायते । अलौकिकसन्निकर्षाद् दृष्टस्य सर्पस्य सर्पत्वरूपधर्मः पूर्वोक्तविशेषज्ञानाकाङ्क्षां शमयितुम् इदम्पदवाच्ये रज्जौ समवायसम्बन्धेन प्रकारीभूय भासते । तदैव अयं सर्पः इत्येवं चाक्षुषप्रत्यक्षं जायते । एवमस्ति नव्यनैयायिकानुसारी अन्यथाख्यातिवादः ।

**अन्यथाख्यातिवादखण्डनम्**

अयं च अन्यथाख्यातिवादः शुक्तौ रजतभ्रमस्थले न युज्यत इति अद्वैतवेदान्तिनामभिप्रायः । यतो हि सन्निकृष्टे रज्जौ दूरदेशस्थस्य सर्पस्य तद्गतसर्पत्वधर्मस्य वा न कदापि प्रतीतिः सम्भवति, दूरदेशस्थवस्तुना सह इन्द्रियसन्निकर्षाभावात् । न च अत्र ज्ञानलक्षणारूपेण अलौकिकसन्निकर्षेण दूरदेशस्थस्य सर्पस्य प्रतीतिर्भवतीति वक्तुं शक्यते, तथा सति अनेन अलौकिकसन्निकर्षेण एव पर्वतस्थस्य वह्नेः प्रत्यक्षं जायेत, तथा सति अनुमानप्रमाणस्य आवश्यकताभावात् तस्य उच्छेदापत्तिः । अतः शुक्तौ रजतभ्रमस्थले ज्ञानलक्षणासन्निकर्षः न स्वीकार्यः । यदि तावद् उच्यते यत् प्रकृते पूर्वानुभूतस्य सर्पस्य संस्कारो जायते, तेनैव संस्कारेण रज्जौ तादृशसर्पस्य प्रत्यक्षं भवतीति, तदपि न वाच्यम्, यतो हि तथा सति स्मृतिज्ञानस्यापि प्रत्यक्षत्वापत्तिः । यतो हि संस्कारमात्राद् यद् ज्ञानं जायते तत् स्मृतिः इत्युच्यते । अतः संस्कारात् प्रत्यक्षज्ञानं न सम्भवति । एवम् उक्ताभिः रीतिभिः शुक्तौ रजतभ्रमस्थले सर्पस्य प्रतीतिः न सम्भवतीति अन्यथाख्यातिवादः अयुक्तः ।

**अख्यातिवादः**

प्राभाकरमीमांसकानाम् अख्यातिवादो वर्तते । एतेषां मते सर्वमेव ज्ञानं

यथार्थं भवति । भ्रमरूपं ज्ञानं भवितुं नार्हत्येव । शुक्तौ रजतज्ञानस्थले ज्ञानद्वयं जायते तेषां मते । एकं हि प्रत्यक्षात्मकम्, अपरं तावत् स्मरणात्मकम् । तत्र इदम् इति प्रत्यक्षस्य विषयः, रजतं हि स्मृतेर्विषयः । चक्षुरिन्द्रियस्य तिमिरादिदोषवशात् शुक्तित्वधर्मविशिष्टतया शुक्तेः विशेषज्ञानं न भवति, अपि तु इदम्रूपेण प्रत्यक्षात्मकं सामान्यज्ञानं जायते । तदनन्तरं शुक्त्या सह दोषयुक्तचक्षुषः सन्निकर्षे सति लोभादिप्रमातृगतदोषात्, शुक्तिनिष्ठ-चाकचिक्यरूप-प्रमेयगतदोषात् च पूर्वदृष्टस्य रजतस्य संस्कारः उद्बुद्धो भवति । तेन च रजतस्य स्मृतिर्जायते । यद्यपि स्मृतौ "तद् रजतम्" इत्येवंप्रकारेण तत्त्वांशयुक्तं ज्ञानं भवति, तथापि इद्रियगत-तिमिरादिदोषात्, प्रमातृगत-लोभादिदोषात्, प्रमेयगत-सादृश्यदोषाच्च तत्त्वांशस्य लोपो जायते । तत्त्वांशस्य लोपे सति इदमिति प्रत्यक्षात्मकं ज्ञानं, रजतमिति स्मरणात्मकं ज्ञानं युगपदेव भवति चेदपि प्रमाता भिन्नज्ञानरूपेण न अवगच्छति । एवमत्र द्वयोः यथार्थज्ञानयोः भेदाग्रहणात् सामानाधिकरण्येन इदं रजतमिति ज्ञानम् उत्पद्यते ।

अयमेव अख्यातिवादो भगवता शङ्कराचार्येण पूर्वपक्षत्वेनोक्तः—"केचित्तु यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रमः"[५] इति । भाष्यरत्नप्रभायाम् एतद्व्याख्यानावसरे उक्तं यत् "यत्र यस्याध्यासो लोकसिद्धस्तयोरर्थयोस्तद्धियोश्च भेदाग्रहे सति तन्मूलो भ्रमः, इदं रूप्यमिति विशिष्टव्यवहार इति वदन्तीत्यर्थः"[६] इति ।

## अख्यातिवादखण्डनम्

अख्यातिवादिनां मतमिदम् अयुक्तम् । यतो हि शुक्तौ रजतदर्शनानन्तरं तद्ग्रहणे प्रवृत्तः पुरुषः यदा रजतं न प्राप्नोति, तदा स वदति यत्—"इदं न रजतम्, रजततत्वशून्यायां शुक्तौ इदं रजतम् इत्येवंप्रकारकं भ्रमात्मकं विशिष्टं ज्ञानं मम सञ्जातम्" इति । एवं तु न कोऽपि वदति यत् "रजतविषयकस्मृतेः शुक्तिज्ञानस्य च भेदाग्रहणात् मम रजतग्रहणे प्रवृत्तिः जाता" इति । अतः अनुभवस्य अपलापात् अख्यातिवादिनां मतम् अयुक्तम् । अतः अत्र अवश्यं स्वीकर्तव्यं यत् इदं रजतमिति विशिष्टज्ञानपूर्वकं रजतग्रहणे प्रवृत्तिर्भवतीति । अपि च इदं रजतमिति भ्रमस्थले इदमिति प्रत्यक्षात्मकं, रजतमिति स्मृत्यात्मकं

[५] ब्रह्मसूत्रस्य अध्यासभाष्यम्
[६] शाङ्करभाष्यस्यभाष्यरत्नप्रभाटीका पृ.१४

ज्ञानमिति ज्ञानद्वयस्वीकारे सति नेदं रजतम् इत्येवं बाधे सति स्मृतिप्रत्यक्षयोः कतरस्य बाधः इति शङ्का समुदियात् ।

अत एव रजतग्रहणे प्रवृत्तेः हेतुरूपेण इदं रजतम् इति भ्रमात्मकं विशिष्टज्ञानम् अवश्यम् अङ्गीकार्यम् । इत्थम् प्राभाकरमीमांसकानाम् अख्यातिवादस्य अयुक्तता सिध्यति ।

**असत्ख्यातिवादः**

शून्यवादिबौद्धानाम् असत्ख्यातिवादः अस्ति । एतेषां मते शून्यमेव परमसत्ता, तदेव आत्मा । यतो हि सुषुप्त्युत्थितस्य जनस्य "सुषुप्तिकाले अहं नासम्" इत्येवंप्रकारकः अनुभवो जायते । एतेन आत्मनः शून्यत्वं सिध्यति । न केवलम् आत्मनः, अपि तु परिदृश्यमानं समस्तं वस्तु शून्यस्वरूपम् अर्थात् असत् । उत्पत्तेः पूर्वमपि जगदिदम् असदेवासीत् । तथाहि श्रुतिः "असद्वा इदमग्र आसीत्" [तैत्तिरीयोपनिषत् २.१] इति । नाशादनन्तरमपि असदेव भवति । तस्माद् आदौ अन्ते च असतो वस्तुनः मध्यावस्थायामपि असत्त्वमेव अङ्गीकार्यम् ।

एवं शुक्तौ इदं रजतम् इति भ्रमस्थले अधिष्ठानं शुक्तिरपि असत्, तत्र प्रतीयमानं रजतमपि असत् । एवं शुक्तौ अत्यन्तस्य असतः रजतस्य कल्पनात् ख्यातिरियं असत्ख्यातिरुच्यते । अयम् असत्ख्यातिवादः पूर्वपक्षत्वेनोक्तो भगवता शङ्कराचार्येण "अन्ये तु यत्र यदध्यासः तस्यैव विपरीतधर्मत्वकल्पनाम् आचक्षते"[७] इति ।

**असत्ख्यातिवादखण्डनम्**

शून्यवादिनां मतं तु सर्वथा अयुक्तम् । यतो हि सुषुप्तपुरुषस्य अनुभवद्वारा शून्यतायाः सिद्धिर्न सम्भवति । सुषुप्त्युत्थितस्य जनस्य "अहं सुषुप्तौ नासम्" इति इत्यनुभवो नैव जायते, अपि तु "सुखमहम् अस्वप्सम्, न किञ्चिद् अवेदिषम्" इत्येवमनुभवो जायते । एतेन ज्ञातुः आत्मनः सत्ता एव सिध्यति, न तु शून्यता । शून्यवादे शून्यस्य सर्वस्थानेषु सत्त्वात् व्यवहार एव न सम्भवति । शून्येन व्यवहारे स्वीकृते तु जलस्य प्रयोजनं वह्निना सिद्ध्येत्, शून्यरूपेण जलवह्न्योः उभयोः साम्यात् । किञ्च असत्ख्यातिवादिनां कृते प्रश्नो यत् तन्मते असत् इत्यस्य शशशृङ्गवत् तुच्छत्वम् इत्यर्थः उत

[७] ब्रह्मसूत्रस्य अध्यासभाष्यम्

त्रिकालाबाध्यरूपसद्विलक्षणत्वे सति बाधयोग्यत्वम् इत्यर्थः। आद्ये तु शुक्त्यादीनां प्रतीतिरेव न जायेत। द्वितीये तु अनिर्वचनीयख्यातिरेव सिध्यतीति असत्ख्यातिवादः हेयः।

**अनिर्वचनीयख्यातिवादः**

अद्वैतवेदान्तिनां हि अनिर्वचनीयख्यातिवादः। सदसद्विलक्षणं हि अनिर्वचनीयमुच्यते। भगवता शङ्कराचार्येण अध्यासभाष्ये प्रोक्तम् अध्यासस्य सिद्धान्तलक्षणं इमम् अनिर्वचनीयख्यातिवादमेव प्रतिपादयतीति तेषामाशयः। तथाहि तल्लक्षणं "स्मृतिरूपः परत्र पूर्वदृष्टावभासः"[८] इति। शुक्तौ रजतभ्रमस्थले परत्र शुक्तिकादौ पूर्वदृष्टस्य सर्पस्य स्मृतिरूपः अवभासो जायते। एतेषां मते निखिलाः पदार्थाः एव चैतन्ये अध्यस्ता वर्तन्ते। रज्जौ सर्पभ्रमस्थले रज्जुः चैतन्ये अध्यस्ता, तस्मिंश्च रज्जुत्वावच्छिन्ने चैतन्ये अनिर्वचनीयस्य सर्पस्य अध्यासो भवति।

अनिर्वचनीयवादे भ्रमस्थले सर्पादेः उत्पत्तिप्रक्रिया इत्थम्—इन्द्रियाणां दोषवशात् रज्जुत्वविशिष्टस्य रज्जोः ज्ञानं न जायते, तस्मात् रज्जोः अधिष्ठानभूते-जीवचैतन्यनिष्ठ-अविद्यायां क्षोभो[९] जायते। तत्क्षोभवशात् प्रातिभासिकस्य सर्पादेः उत्पत्तिर्जायते।

अद्वैतिनां नये अयं भ्रमः अनिर्वचनीयः। रजतं न सत् शुक्तिज्ञाने प्राप्ते तद्बाधात्, नापि अत्यन्तम् असत् तस्य प्रतीतिसत्त्वात्, नापि सदसद्विरोधी। अतः सद्विलक्षणा असद्विलक्षणा सदसद्विलक्षणा च अनिर्वचनीया ख्यातिः प्रकृते अद्वैतवेदान्तिनां नये।

**उपसंहारः**

आत्मख्यातिवादः असत्ख्यातिवादः अख्यातिवादः अन्यथाख्यातिवादः अनिर्वचनीयख्यातिवादश्चेति पञ्चसु ख्यातिवादेषु अद्वैतवेदान्तानुसारी अनिर्वचनीयख्यातिवादः एव सिद्धान्तत्वेन अङ्गीकार्य इति प्रबन्धाशयः। आन्तरदेशे विद्यमानस्य रजतस्य बाह्यदेशे अस्तित्वं नास्तीति विज्ञानवादिनाम् आत्मख्यातिवादः अनुभवविरोधात् खण्डितः। सन्निकृष्टे रज्जौ दूरदेशस्थस्य सर्पस्य तद्गतसर्पत्वधर्मस्य वा प्रतीतिर्जायत इति नैयायिक-भाट्टमीमांसकानुसारी अन्यथाख्यातिवादोऽपि खण्डितः दूरदेशस्थवस्तुना

[८] अध्यासभाष्यम्— अध्यासस्य सिद्धान्तलक्षणम्

[९] कार्याभिमुखतारूप-अवस्था क्षोभ उच्यते।

सह इन्द्रियसन्निकर्षाभावात्। शुक्तौ रजतज्ञानस्थले प्रत्यक्षं स्मृतिश्चेति ज्ञानद्वैविध्यम् अङ्गीकुर्वताम् प्राभाकरमीमांसकानाम् अख्यातिवादः अपि खण्डितः एकज्ञानस्वीकारस्यैव युक्तत्वात्। शून्यवादिबौद्धानाम् असत्ख्यातिवादश्च शून्यसिद्धिप्रकारस्य अनुभवविरुद्धत्वादेव खण्डितः। इत्थं इतरवादचतुष्टयस्य अयथार्थत्वं प्रतिपादयता अनिर्वचनीयख्यातिवादस्य यथार्थता प्रतिष्ठापितेति शम्।

✶ ✶ ✶

## Bibliography


1. *ब्रह्मसूत्रशांकरभाष्यम्* (श्रीगोविन्दानन्दकृतया भाष्यरत्नप्रभया श्रीवाचस्पतिमिश्रविरचितया भामत्या श्रीमदानन्दगिरिप्रणीतेन न्यायनिर्णयेन समुपेतम्) ; शङ्कराचार्यः ; आचार्यजगदीशशास्त्री (सम्पादकः) ; मोतीलाल बनारसी दासः ; वाराणसी ; २०१० ।
2. *ख्यातिवादः* ; श्रीशङ्करचैतन्तभारती ; शङ्करचैतन्यभारती (सम्पादकः) ; संस्कृतकलेज ; कलिकाता ।
3. *सर्वदर्शनसंग्रहः* ; श्रीमाधवाचार्यः ; डा. माधव जनार्दन रटाटे (व्याख्याकारः) ; द भारतीय विद्या प्रकाशन ; वाराणसी ।
4. *ब्रह्मसूत्रशांकरभाष्यम्* (एकादशीटीकासंयुतम्) ; शङ्कराचार्यः ; प्रो. योगेश्वरदत्तशर्मा (पाराशरः) (सम्पादकः) ; दिल्ली नाग प्रकाशकः ; १९९७ ।
5. *Vedāntadarśanam* (Prathama bhāga) [Bengali] ; Svāmī Viśvarūpānanda ; Svāmī Cidghanānanda Purī (Sampādaka) ; Udvodhana Kāryālaya ; Kalikātā ; 1993.


✳ ✳ ✳